शास्त्री - II खण्ड          साहित्य
रघुवंश - त्रयोदशः सर्गः

Date __/__/__

प्र० (1) त्वं रक्षसा भीरु! यतोऽपनीता तं मार्गमेता कृपया लता मे ।
अदर्शयन् वक्तुमशक्नुवत्यः शाखाभिरावर्जितपल्लवाभिः ॥

उत्तरम् :- प्रसंगः :- प्रस्तुतोऽयं श्लोकः महाकविदास निर्मितः रघुवंशमहाकाव्यस्य त्रयोदशसर्गात् उद्धृतोऽस्ति ।

अस्मिन् श्लोके श्रीरामः सीतां प्रति कथयति —
हे भयशीले जानकि! रावणः त्वमपहृत्य येन मार्गेण गतवान् तं मार्गं मानवा इव वक्तुमसमर्था एता लताः दयार्द्राः सत्यः अङ्गुलिभिरिव अवनमितादयोऽपि समुदुःखभाजो भवन्ति । तथाहि भगवान् मनुः —

तमसा बहुरूपेण वेष्टिताकर्म हेतुना ।
अन्तः संज्ञा भवन्त्येते सुखदुःखसमन्विता ॥

व्याख्या :- हे भीरु ! = भयशीले सीते! त्वम् = भवती । रक्षसा = राक्षसेन रावणेन । यतः = येन मार्गेण । अपनीता = अपहृता । तम् = तादृशम् मार्गम् = पन्थानम् । वक्तुम् = भाषितुम् । अशक्नुवत्यः = असमर्था वागिन्द्रयाभावाद्वक्तुमसमर्थाः । एताः = इमाः । लताः = वल्लयः आवर्जितपल्लवाभिः = पाणिस्थानीयाभिर्नमितकिसलयाभिः शाखाभिः = भुजस्थानीयैः विटपैः । कृपया = दयया । मे = मम कृते । अदर्शयन् = दर्शितवत्यः ।

Renu Devi
5/12/20

राधा उमाकान्त सं० महावि० सुखसेना, पूर्णिया ।

Page No.

शास्त्री - I खण्ड साहित्य

अभिज्ञानशाकुन्तलम् - षष्ठोऽङ्कः

Date ___ /___ /______

प्रश्न - कृताः शरव्यं हरिणा तवासुराः शरासनं तेषु विकृष्यतामिदम्।
प्रसादसौम्यानि सतां सुहृज्जने पतन्ति चक्षूंषि न दारुणाः शराः॥

उत्तरम् - प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य अभिज्ञानशाकुन्तलम् नाट्यशास्त्रस्य षष्ठोऽङ्कात् उद्धृतोऽस्ति।

अस्मिन् श्लोके नृपतिं दुष्यन्तं क्रुद्धमवगत्य विदूषकं परित्यज्य मातलिर्ब्रूते -

व्याख्या:- हरिणा = इन्द्रेण असुराः = दैत्याः तव = दुष्यन्तस्य शरव्यं = लक्ष्यं कृताः = विहिता, दैत्याः त्वया हन्तव्या इति हरेरभिप्रायेत्यर्थः 'लक्ष्यं लक्ष्यं शरव्यं च' इत्यमरः। अतः तेषु = लक्ष्मीभूतेषु दैत्येषु इदं = सज्जं, शरासनं = सन्धितसरं धनुः विकृष्यताम् = आकृष्यताम्, तदर्थमेवाहमागतोऽस्मि, स्वयमिन्द्रेण प्रार्थितस्त्वं दैत्यान् जहि मास्तु ते मयि शरत्यागः इति भावः। सतां = सज्जनानां भवादृशां सुहृज्जने = स्वमित्रादिबन्धुवर्गे प्रसादसौम्यानि प्रसदेन = प्रसन्नतया, सौम्यानि = अनुग्राह्यापि, आह्लादकानि प्रसादमधुराणि चक्षूंसि = नेत्राणि पतन्ति, दृष्टयो निधीयन्ते न तु दारुणाः = भयङ्कराः मर्मभेदिनः शराः = वाणाः न निपतन्ति। अतस्त्वमपि मयि सुहृदि बन्धुवर्गे स्नेहमसृणे लोचने निक्षिप न खलु तवशरपातोचितोऽहम्। अहं हि वान्धवतया समागतो भवतः प्रसन्नदृष्टेरेव पात्रमस्मि न वाणपातस्येति सङ्किन्यतां निजमायुधमिति भावः। अर्थान्तरन्यास - परिसंख्या - काव्यलिङ्गम लङ्काराः वंशस्थं वृतञ्च।

Renu Devi
05/12/20
राधा उमाकान्त सं॰ महावि॰ सुखसेना,
पूर्णिया।

Page No. [ ]

उपशास्त्री - II खण्ड  साहित्य - तृतीय - पत्रम्
रघुवंश महाकाव्यम् -
द्वितीयः सर्गः

प्र० (1) भक्त्या गुरौ मय्यनुकम्पया च प्रीताऽस्मि ते पुत्र! वरं वृणीष्व।
न केवलानां पयसां प्रसूतिमवेहि मां कामदुघां प्रसन्नाम् ॥

उत्तरम् - प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य रघुवंश महाकाव्यस्य द्वितीयसर्गात् उद्धृतोऽस्ति।

अस्मिन् श्लोके राजा दिलीपं प्रति नन्दिन्याः उक्ति - राजन्! सप्रश्रयं तव गुरुभक्तिं मयि दयाभावञ्चावलोक्य त्वयि नितरां प्रसन्नाऽस्मि। हे वत्स! मनोवाञ्छितं वरं याचस्व, मां केवलं दुग्धदानसमर्थामेव गां न जानीहि, किन्तु कामधेनुमिव सकलार्थपूरणसमर्थामवेहि।

व्याख्या:- पुत्र! = हे वत्स!, गुरौ = वसिष्ठे, भक्त्या = श्रद्धया, मयि = धेनौ नन्दिन्याम्, अनुकम्पया = दयया, च = पुनः, ते = तुभ्यम्, प्रीताऽस्मि = अहं प्रसन्नाऽस्मि, अतः, वरं = अभिलषितमर्थम्, वृणीष्व = वरय, वा, यतः मां = नन्दिनीम्, केवलानां = एकाकिनाम्, पयसां = दुग्धानामेव, प्रसूतिं = जनयित्रीम्, उद्भवं कारणं वा, न अवेहि = मा मन्यस्व, किन्तु प्रसन्नां = प्रीताम्, मां = नन्दिनीम्, कामदुघाम् = सकलाभीष्टप्रदामपि, अवेहि = जानीहि विद्धि वा।

Renu Devi
05/12/20

राधा उमाकान्त सं० महावि० सुखसेना,
पूर्णिया।

उपशास्त्री - I खण्ड साहित्य - तृतीयःपत्रम्
रघुवंश महाकाव्यम्
द्वितीयः सर्गः

Date __/__/__

प्र० (1) - आपीनभारोद्वहनप्रयत्नात् गृष्टिर्गुरुत्वाद्वपुषो नरेन्द्रः ।
उभावलञ्चक्रतुरञ्चिताभ्यां तपोवनावृत्तिपथं गताभ्याम् ॥

उत्तरम् - प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य रघुवंश महाकाव्यस्य द्वितीय सर्गात् उद्धृतोऽस्ति।

अस्मिन् श्लोके राजा दिलीपः स्वगां प्रति कथयति - स्तनभारात् मन्दगमनाया नन्दिन्या शरीरस्थौल्यात् मत्तगजेन्द्रवत् गमनशीलस्य राज्ञो दिलीपस्य च चारुचक्रमणैः आकर्षक मन्थनगमनेन वा वनमार्गः शोभामवाप ।

व्याख्या:- गृष्टिः = सकृत्प्रसूता गौ नन्दिनी, आपीन भारोद्वहनप्रयत्नात् = ऊधो भारनयनप्रयासात्, नरेन्द्रः = राजेन्द्रो दिलीपश्च, वपुषः = शरीरस्य, गुरुत्वात् = गौरवात्, अञ्चिताभ्यां = मनोहराभ्याम्, गताभ्यां = सलीलगमनाभ्याम्, तपोवनावृत्तिपथं = आश्रमपरावर्तनमार्गम्, अलञ्चक्रतुः = भूषयामासतुः ।

Renu Devi
05/12/20

राधा उमाकान्त सं० महावि० सुखसेना,
पूर्णिया ।